# Brahmavishnukritam 2 Shiva Stotram

# ब्रह्मविष्णुकृतं २ शिवस्तोत्रम्

## Document Information

Text title : Brahmavishnukritam 2 Shiva Stotram

File name : brahmaviShNukRRitaM2shivastotram.itx

Category : shiva, shivapurANa, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : shivapurANa | rudrasaMhitA | yuddhakhaNDa | adhyAya 30/33-39||

Latest update : February 5, 2025

Send corrections to : sanskrit at cheerful dot c om


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.


February 10, 2025

*sanskritdocuments.org*

# ब्रह्मविष्णुकृतं २ शिवस्तोत्रम्

विष्णुविधी ऊचतुः ।
देवदेव महादेव परब्रह्माखिलेश्वर ।
त्रिगुणातीत निर्व्यग्र त्रिदेवजनक प्रभो ॥ २७॥

वयं ते शरणापन्ना रक्षास्मान्दुखितान्विभो ।
शङ्खचूडार्दितान्क्लिष्टान्सन्नाथान्परमेश्वर ॥ २८॥

अयं योऽधिष्ठितो लोको गोलोक इति स स्मृतः ।
अधिष्ठाता तस्य विभुः कृष्णोऽयं त्वदधिष्ठितः ॥ २९॥

पार्षद्प्रवरस्तस्य सुदामा दैवयन्त्रितः ।
राधाशप्तो बभूवाथ शङ्खचूडश्च दानवः ॥ ५.३०.३०॥

तेन निस्सारिताः शम्भो पीड्यमानाः समन्ततः ।
हृताधिकारस्त्रिदशा विचरन्ति महीतले ॥ ३१॥

त्वां विना न स वध्यश्च सर्वेषां त्रिदिवौकसाम् ।
तं घातय महेशान लोकानां सुखमावह ॥ ३२॥

त्वमेव निर्गुणस्सत्योऽनन्तोऽनन्तपराक्रमः ।
सगुणश्च सन्निवेशः प्रकृतेः पुरुषात्परः ॥ ३३॥

रजसा सृष्टिसमये त्वं ब्रह्मा सृष्टिकृत्प्रभो ।
सत्त्वेन पालने विष्णुस्त्रिभुवावनकारकः ॥ ३४॥

तमसा प्रलये रुद्रो जगत्संहारकारकः ।
निस्त्रैगुण्ये शिवाख्यातस्तुर्यो ज्योतिःस्वरूपकः ॥ ३५॥

त्वं दीक्षया च गोलोके त्वं गवां परिपालकः ।
त्वद्गोशालामध्यगश्च कृष्णः क्रीडत्यहर्निशम् ॥ ३६॥

त्वं सर्वकारणं स्वामी विधि विष्णवीश्वरः परम् ।

निर्विकारी सदा साक्षी परमात्मा परेश्वरः ॥ ३७॥

दीनानाथसहायी च दीनानां प्रतिपालकः ।
दीनबन्धुस्त्रिलोकेशश्शरणागतवत्सलः ॥ ३८॥

अस्मानुद्धर गौरीश प्रसीद परमेश्वर ।
त्वदधीना वयं नाथ यथेच्छसि तथा कुरु ॥ ३९॥

इति शिवपुराणे रुद्रसंहितायां युद्धखण्डे
त्रिंशाध्यायान्तर्गतं ब्रह्म-विष्णुकृतं शिवस्तोत्रं
समाप्तम् ।

शिवपुराण । रुद्रसंहिता । युद्धखण्ड । अध्याय ३०/३३-३९॥

shivapurANa . rudrasaMhitA . yuddhakhaNDa . adhyAya 30/33-39..

Proofread by PSA Easwaran

*Brahmavishnukritam 2 Shiva Stotram*

pdf was typeset on February 10, 2025

Please send corrections to *sanskrit@cheerful.com*